International Journal of Sanskrit Research 2020; 6(1): 94-100

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 94-100
© 2020 IJSR
www.anantaajournal.com
Received: 29-11-2019
Accepted: 31-12-2019

डॉ. सीमा जैन
असि. प्रोफेसर, सामान्य संस्कृत राज. महाराज आचार्य संस्कृत महाविद्यालय, जयपुर, राजस्थान, भारत

Corresponding Author:
डॉ. सीमा जैन
असि. प्रोफेसर, सामान्य संस्कृत राज. महाराज आचार्य संस्कृत महाविद्यालय, जयपुर, राजस्थान, भारत

# माघकाव्ये दर्शनतत्त्वानि

**डॉ. सीमा जैन**

**प्रस्तावना**

महाकविः माघः संस्कृतसाहित्याकाशे जाज्वल्यमानं नक्षत्रमस्ति। महाकवेरेका एव कृतिः 'शिशुपालवधम्' तेषां यशसःकारणभूता। महाकविना स्वकीया बहुमुखी प्रतिभा प्रकटिता महाकाव्येऽस्मिन्। महाकाव्यमिदं 'बृहत्त्रय्यां' परिगणितम्। एतदतिरिक्तं भारवेः 'किरातार्जुनीयम्' श्रीहर्षस्य नैषधीयचरितञ्च बृहत्त्रय्यां परिगणिते। काव्यजगति विविधा उक्तयः काव्यस्यास्य श्रेष्ठतामुद्घोषयन्ति। तासु काव्येषु माघः' 'मेघे माघे गतं वयः' 'माघे सन्ति त्रयो गुणाः' इत्यादय उल्लेखनीयाः सन्ति। महाकविना महाकाव्यस्य शास्त्रीयलक्षणानुसारं स्वकाव्यमलङ्कृतम्। यस्य विषयस्य वर्णनमारभ्यते कविना तस्य सकलपक्षाणां निरूपणं क्रियते।

दृश्यतेऽनेनेत्यर्थे 'दृश्' धातोः करणेऽर्थे ल्युटि अनादेशे दर्शनशब्दो निष्पद्यते। दर्शनविषयस्त्वात्मा। भारतीयदर्शने आत्मयदर्शनं जीवनस्य चरमलक्ष्यम्। श्रवणं मननं निदिध्यासनञ्चेति आत्मदर्शनस्य त्रीणि साधनानि। भारतीयदर्शनमास्तिकं नास्तिकञ्चेति द्विधा विभक्तम्। यत्र वेदप्रामाण्यं तदास्तिकम्। तद्भिन्नं नास्तिकम्। महाकविमाघेन शिशुपालवधे सर्वेषां दर्शनानां प्रत्यक्षाप्रत्यक्षारूपेण निरूपणं कृतम्। प्रसङ्गेऽस्मिन् तेषां सन्दर्भाणां विचारणा कृता।

**सांख्यदर्शनम्**

"संख्यायन्ते गणयन्ते येन तत् सांख्यम्" तथा "प्रकृतिपुरुषान्यताख्यातिरूपोऽवबोधः सम्यग्ज्ञायते येन तत् सांख्यम् इति सांख्यस्य अर्थद्वयं कृतम्। सांख्ये पञ्चविंशतितत्त्वानां गणना कृता। तेषु प्रकृतिपुरुषयोः विशेषमहत्त्वम्। सांख्यदर्शनस्य प्रणेता महर्षिकपिलोऽस्ति।

महाकविमाघः प्रस्तुत पद्ये सांख्यसम्मतपुरुषस्य निरूपणं प्रस्तौति –

उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथञ्चन।
बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः।।[1]

पुराविदः पूर्वज्ञाः कपिलादयस्त्वां निगृहीतमानसैरन्त-र्निबद्धचित्तैर्योगिभिः। अध्यात्मं या दृग् ज्ञानं तया अध्यात्मदृशा प्रत्यग्दृष्ट्या कथञ्चन गृहीतं साक्षात्कृतम्। केन रूपेण गृहीतमित्यत आह – उदासितारमुदासीनम्।

प्रकृतौ स्वार्थप्रवृत्तायामपि स्वयमप्राकृतत्वादस्पृष्टमित्यर्थः। अर्थात् प्रकृतिः पुरुषस्य समक्षं स्वरूपमुद्धाटयति। पुरुषस्तु द्रष्टा एव, अत एव उदासीनः कथितः। विकारेभ्यो बहिः बहिर्विकारम् अर्थान्महदादिभ्यः पृथग्भूत म्। किञ्च प्रकृतेस्त्रैगुण्यात्मनो मूलकारणात्पृथग् भिन्नम्। पुरुषं पुरुषपदवाच्यं विज्ञानघनं विदुर्विदन्ति। यथाहुः –

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः।।[2]

'अजामेकां लोहितशुक्लकृष्णाम्' इत्यादिश्रुतिश्च। सोऽपि त्वमेव 'तत्त्वमसि' इत्यादिवाक्यैरैक्यश्रवणात्। तस्मात्त्वमेव साक्षात्करणीय इति सुष्ठूक्तमिति भावः।

मूलप्रकृतिः अविकृतिरव्यक्तेति नाम्ना अभिधीयते। सप्त प्रकृतिविकृतयः सन्ति – बुद्धिरहङ्कारतन्मात्रपञ्चकञ्चेति। एते केषाञ्चित् तत्त्वानां प्रकृतिरूपेण केषाञ्चिच्च तत्त्वानां विकृतिरूपेण तिष्ठन्ति। षोडश विकृतयो भवन्ति। पुरुषस्तु न केनापि उत्पद्यते, न कमपि उत्पादयति, अत एव पुरुषो विकृतिभिन्न इति कथ्यते। पुरुषः प्रकृतेरपि पृथग्यतोहि प्रकृतिः त्रिगुणात्मिकास्ति पुरुषस्तु निर्गुण एव। यथोक्तं सांख्यकारिकायाम् ईश्वरकृष्णेन–

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्।।[3]

एवमेव द्वितीयसर्गे राजनीतिकमन्त्रणाप्रसङ्गे पुरुषस्य साक्षिमात्रत्वं स्पष्टीकृतम् –

विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम्।
फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि।।[4]

सेनायाः कर्त्र्या विजयः साक्षिमात्रे उदासीने एव फलभाजि त्वयि समीक्ष्योक्ते सांख्योक्ते आत्मनि बुद्धेर्महत्तत्त्वस्य मूलप्रकृतेः प्रथमविकारस्य कर्त्र्या भोगः सुखदुःखानुभव इवापदिश्यतां व्यवह्रियताम्। भृत्यजयपराजययोः स्वामिगम्यत्वादिति भावः। सांख्या अप्याहुः – 'कर्तेव भवत्युदासीनः' इति सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः' इति च। प्रकृतपुरुषपार्थक्यज्ञानेनैव मुक्तिर्भवती इति तथ्यं समुपस्थापयति कविः -

ख्यातिं च सत्त्वपुरुषान्यतयाधिगम्य
वाञ्छन्ति तामपि समाधिभृतो न रोद्धुम्।।[5]

'प्रकृतिपुरुषयोर्विवेकाग्रहणात् संसारः। विवेकग्रहणान्मुक्ति'रिति सांख्याः। 'प्रकृतावुपरतायां पुरुषस्वरूपेणावस्थानं मुक्तिः' इति सांख्यसिद्धान्तः। अपि च -

तस्य सांख्यपुरुषेण तुल्यतां बिभ्रतः स्वयमकुर्वतः क्रियाः।
कर्तृता तदुपलम्भतोऽभवद्वृत्तिभाजि करणे यथर्त्विजि।।[6]

क्रियाः कर्माणि होमादीनि, अन्यत्र पुण्यपापकर्माणि। स्वयमकुर्वतोऽननुतिष्ठतः, अन्यत्र उदासीनस्य। अत एव सांख्यपुरुषेण सांख्यशास्त्रोक्तेनात्मना तुल्यतां बिभ्रतस्तस्य राज्ञः करणेऽन्तःकरणे यथा। बुद्धाविवेत्यर्थः। ऋतौ यजतीति ऋत्विग्याजकः। तस्मिन् वृत्तिभाजि होमादिव्यापारं कुर्वतीत्यर्थः। अन्यत्र पुण्यपापकारिणी सति तदुपलम्भतः तस्या ऋत्विग्वृत्तेरुपलम्भान्ममेदमित्यनुसन्धानादेव कर्तृता क्रियानुष्ठातृत्वमभवत्। तथैव विधिसामर्थ्यादिति भावः। स्वयं क्रियाभोगरहितोऽप्यात्मा बुद्धेः सन्निधानाद्रक्तस्फटिकवत्तथा भवतीत्यर्थः। भगवतः श्रीकृष्णस्य सांख्यसम्मतपुरुषत्वं समर्थयन् कथयति कविः -

न महानयं न च बिभर्ति गुणसमतया प्रधानताम्।
स्वस्य कथयति चिराय पृथग्जनतां जगत्यनभिमानतां दधत्।।[7]

अर्थात् श्रीकृष्णः चतुर्विंशतितत्त्वेभ्यो बहिर्भूतः पुरुषसंज्ञकः पञ्चविंशतितमः पुरुषोऽस्ति। पुनश्च निर्गुणत्वमाह पुरुषस्य –

रहितं कलाभिरखिलाभिरकृतरसभावसंविदम्।
क्षेत्रविदमपदिशन्ति जनाः पुरबाह्यमेनमगतं विदग्धताम्।।[8]

योगदर्शनम्

योगशब्दो 'युज्' धातोः निष्पद्यते। युज्यते मनोऽनेनेति योगश्चित्तवृत्तिनिरोधः। योगदर्शनभाष्यकारमहर्षिव्यासमतानुसारं 'योगस्समाधिः'। जीवात्मा समाधौ सच्चिदानन्दस्वरूपब्रह्म साक्षात्करोतीति भावः। योगदर्शनसिद्धान्ताः सांख्यदर्शनतुल्याः। ईश्वरस्वीकृतिरेवात्र वैशिष्ट्यम्। अत एवास्य सेश्वरसांख्यमित्यपि संज्ञा। पतञ्जलिः योगसूत्रं विरच्य योगदर्शनं प्रवर्तितवान्।
महाकविः माघः अद्योलिखितपद्ये अष्टाङ्गयोग-चित्तवृत्ति-पञ्चक्लेश-कैवल्यप्राप्त्यादिविषये सङ्केतं कुर्वन् कथयति –

मैत्र्यादिचित्तपरिकर्मविदो विधाय,
क्लेशप्रहाणमिह लब्धसबीजयोगाः।

ख्यातिं च सत्त्वपुरुषान्यतयाधिगम्य
वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम्।।9

इह रैवतकपर्वते योगिजना मैत्र्यादिचित्तवृत्तिभिः अन्तःकरणमलं दूरीकृत्य अविद्यादिक्लेशान् नाशयित्वा प्रकृतिपुरुषविवेकं कृत्वा मोक्षं प्राप्नुवन्ति। श्लोकेऽस्मिन् समाधिशब्दो अष्टाङ्गयोगस्योपलक्षकोऽस्ति। तानि च अङ्गानि –

"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि।"10

चित्तवृत्तीनां सङ्केतं करोति कविः। ताश्चित्तवृत्तयः – "मैत्रीकरुणामुदितोपेक्षाणां

सुखदु:खपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्।" ।11
तत्र पुण्यकृत्सु मैत्री। दुःखिषु करुणा।
सुखिषु मुदिता अनुमोदनम्। पापिषु उपेक्षा। आभिः चित्तप्रसादनं भवति।

पञ्चक्लेशानां स्मरणं कृतं कविना। ते च पञ्चक्लेशाः- "अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः" ।12 तत्रानित्येषु नित्यत्वाभिमानः, अनात्मनि च देहेन्द्रियादावात्मधीरित्यादिविभ्रमोऽविद्या। अस्मिता अहङ्कारः। रागोऽभिमतविषयाभिलाषः। द्वेषोऽनभिमतेषु रोषः। अभिनिवेशः कार्याकार्येष्वाग्रहः। ते हि पुरुषं क्लिश्यन्ति इति क्लेशाः क्लेशहेतवः। एवं समाधिभृतो योगिनो मैत्र्यादिचित्तवृत्तिभिः क्षीणान्त:करणमलाः क्लेशानां क्षयं विधाय लब्धसबीजयोगा मुक्तिं प्राप्नुवन्ति। एवं योगदर्शनस्य लक्ष्यं मुक्तिरेव महाकविमतानुसारम्। यमनियमानां स्मरणं करोति कविः यथा –

वशिनं क्षितेरयनयाविवेश्वरं नियमो यमश्च नियतं यतिं यथा।
विजयश्रिया वृतमिवार्कमारुतावनुसस्रतुस्तमथ दस्रयोः सुतौ।।13

अत्र यमशब्देन "अहिंसासत्यास्तेयब्रह्मचर्यपरिग्रहा:"14 ग्राह्याः। नियमशब्देन "शौचसन्तोषतपः स्वाध्यायेश्वरप्रणिधानानि"15 ग्राह्यानि।

श्रीकृष्णस्य ईश्वरस्वरूपं समर्थयन्नाह कविः –

ध्येयमेकपथे स्थितं धियः स्तुत्यनुत्तममतीतवाक्पथम्।
आमनन्ति यमुपास्यमादराद् दूरवर्तिनमतीव योगिनः।।16

ध्येयं स्तुत्यं यं योगिनो अवाङ्गनसगोचरमामनन्ति, उपास्यं सेव्यं तथापि अतीवात्यन्तं दूरवर्तिनमामनन्ति। एतादृशं श्रीकृष्णं मानवमात्रमेव न जानीहि। एवमेव–

सर्ववेदिनमनादिमास्थितं देहिनामनुजिघृक्षया वपुः।
क्लेशकर्मफलभोगवर्जितं पुंविशेषममुमीश्वरं विदुः।।17

अमुं कृष्णं सर्ववेदिनं नित्यसर्वमित्यर्थः। अत एवानादिमादिरहितमनादिनि- धनमित्यर्थः, तथापि देहिनामनुजिघृक्षयानुग्रहीतुमिच्छया भूभारावतारणार्थमित्यर्थः। वपुरास्थितं मानुषविग्रहमास्थितं न तु कर्मारब्धशरीरभाजमित्यर्थः। अत एव क्लेशकर्मफलभोगवर्जितम्। क्लेशाः पञ्च अविद्यास्मितारागद्वेषाभिनिवेशाख्याः। कर्माणि पापपुण्यानि तेषां फले सुखदुःखे तयोर्भोगोऽनुभवस्तेन क्लेशैश्च वर्जितम्। तैरसंस्पृष्टमित्यर्थः। ईश्वरमीश्वरशब्दितं पुंविशेषं क्षेत्रज्ञविलक्षणं पुरुषविशेषं परमपुरुषं वा विदुर्विदन्ति सन्त इति शेषः।

योगसूत्रे ईश्वरलक्षणं यथा –

क्लेशर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः।18

पुनश्च श्रीकृष्णस्य निर्गुणत्वमाह –

सकलैर्वपुः सकलदोषसमुदितमिदं गुणैस्तव।
त्यक्तमपगुण गुणत्रितयत्यजनप्रयासमुपयासि किं मुधा।।19

न्यायदर्शनम्

नीयते विवक्षितार्थोऽनेनेति न्यायः। वात्स्यायनमतेन "प्रमाणैरर्थपरीक्षणं न्यायः"। प्राचीनन्यायो नव्यन्यायश्चेति न्यायस्य भेदद्वयम्। आद्यस्य प्रणेता गौतमोऽपरस्य च गङ्गेशोपाध्यायः। गौतमस्य कृतिः न्यायसूत्रम्। गङ्गेशोपाध्यायः तत्त्वचिन्तामणिं विरच्य नव्यन्यायस्य प्रवर्तनमकरोत्।

अधोलिखितपद्ये महाकविमाघः प्रत्यक्षज्ञानप्रक्रियायां निर्विकल्पकसविकल्पक- ज्ञानयो निदर्शनं करोति –

चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम्।
विभुर्विभक्तावयव पुमानिति क्रमादमुं नारद इत्यबोधि सः।।20

विभुर्वस्तुतत्त्वावधारणसमर्थः स हरिः पुरा प्रथमं त्विषां चय इत्यवधारितं तेजःपुञ्जमात्रत्वेन विनिश्चितम्। ततः प्रत्यासन्ने सति

विभाविता विमृष्टा आकृतिः संस्थानं यस्य तं तथोक्तम्। अत एव शरीरी चेतन इत्यवधारितम्। ततो विभक्ता विविच्य गृहीता अवयवा मुखादयो यस्य तं तथोक्तम्। अत एव पुमानित्यवधारितम्। अमुमागच्छन्तं व्यक्तिविशेषं क्रमात् पूर्वोक्तसामान्यविशेषज्ञानक्रमेण। लोकदृष्ट्येदमुक्तम्। हरिस्तु सर्वं वेदैवेति तत्त्वम्। नारद इत्यबोधि। नारदं बुद्धवान्। ज्ञानस्य प्रक्रियायां पूर्वं निर्विकल्पकं ततश्च सविकल्पकं ज्ञानं भवति। तस्यैव उदाहरणमत्र प्रस्तुतं महाकविना। प्रस्तुतेऽस्मिन् पद्ये पूर्वं निरवयवज्ञानं भवति, यदा वस्तु समीपमागच्छति तदा सावयवज्ञानं भवति। ततश्च निश्चयात्मकं ज्ञानं भवति।

प्रस्तुतपद्ये कविः "शब्दगुणकमाकाशम्" इति तथ्यं निरूपयति –

अप्यनारभमाणस्य विभोरुत्पादिताः परैः।
व्रजन्ति गुणतामर्थाः शब्दा इव विहायसः।।[21]

अनारभमाणस्य स्वयमकिञ्चित्कुर्वाणस्यापि विभोः प्रभोः व्यापकस्य च परैरन्यैर्नृपतिभिः शङ्खभेर्यादिभिश्च उत्पादिताः सम्पादिता, जनिताश्चार्थाः प्रयोजनानि विहायस आकाशस्य शब्दा इव गुणतां विशेषणतां कारणत्वाद् गुणत्वं व्रजन्ति। शक्तो हि राजा स्वयमुदासीन एवाकाशवत् स्वमहिम्नैव कार्यदेशं व्याप्नुवन् शब्दानिव सर्वार्थानपि स्वकीयतां नयतीत्यर्थः।

पुनश्च आकाशस्य शब्दसमवायिकारणत्वं समर्थयन् कथयति कविः–

बबृंहिरे गजपतयो महानकाः प्रदध्वनुर्जयतुरगा जिहेषिरे।
असम्भवद्गिरिवरगह्वरैरभूत्तदा रवैर्दलित इव स्व आश्रयः।।[22]

गजपतयो बबृंहिरे बृंहणं चक्रुरित्यर्थः, महानकाः प्रदध्वनुः, जयतुरगा जिहेषिरे। तदा तस्मिन् काले असम्भवन्त्यन्तर्धातुमपर्याप्नुवन्ति गिरिवरगह्वराणि येषां तैः गिरिवरगह्वरेषु आभाद्भिः। अवर्तमानैरित्यर्थः। रवैर्बृंहणादिघोषैः। स्व आश्रयः स्वसमवायिकारणमा-काशो दलित इव विदारित इवाभूदित्युत्प्रेक्षा तया तेषामतितीव्रत्वं व्यज्यते।

आकाशस्य शून्यत्वमक्रियत्वञ्च सङ्केतयति कविः –

मांसव्यधोचितमुखैः शून्यतां दधदक्रियम्।
शकुन्तिभिः शत्रुबलं व्यापि तस्येषुभिर्नभः।।[23]

निम्नलिखितश्लोके अनुमानप्रमाणघटकानां पञ्चावयवानां निरूपणं प्रस्तुतं कविना–

अनुसन्ततिपातिनः पटुत्वं दधतः शुद्धभृतो गृहीतपक्षाः।
वदनादिव वादिनोऽथ शब्दाः क्षितिभर्तुर्धनुषः शराः प्रसस्रुः।।[24]

अथाकर्षणान्तरं क्षितिभर्तुश्चैद्यस्य धनुषः सकाशाद् अनुसंततया पतन्तीत्यनुसंततिपातिनोऽविच्छेदवर्तिनः पटुत्वं लक्ष्यभेदपाटवं, वाचकत्वशक्तिञ्च दधतः शुद्धिभृतो लोहशुद्धिभृतो विषरहिता वा, अन्यत्र साधव इत्यर्थः। गृहीतपक्षाः स्वीकृतकङ्कादिपत्राः, अन्यत्र गृहीतनित्यत्वादिसाध्यर्थाः शरा वादिनः कथकस्य वदनाच्छब्दाः प्रतिज्ञाहेत्वादय इव प्रसस्रुर्निजग्मुः। "प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि" पञ्चावयवाः सन्ति। पुनश्च प्रमाणानां चर्चा यथा–

इषुवर्षमनेकमेकवीरस्तदरिप्रच्युतमच्युतः पृषत्कैः।
अथ वादिकृतं प्रमाणमन्यैः प्रतिवादीव निराकरोत्प्रमाणैः।।[25]

एकवीरो महाशूरोऽच्युतो हरिररिप्रच्युतं शत्रुगलितं तदनेकमपरिमितमिषुवर्षं पृषत्कैर्बाणैः वादिकृतं वादिना प्रयुक्तं प्रमाणमनुमानमन्यैः प्रमाणैः प्रत्यनुमानैः प्रतिवादीव निराकरोत्।

वैशेषिकदर्शनम्

उलूकापरनामधेयः कणादमुनिः वैशेषिकदर्शनस्य प्रवर्तकः। तपसा तुष्टेन महेश्वरेण समुपदिष्टपरमार्थतत्त्वः स वैशेषिकसूत्रं प्रणीतवान्। वैशेषिकदर्शनस्य सिद्धान्ता न्यायदर्शनसदृशाः। विशेषसंज्ञकस्य पदार्थस्यापूर्वतया प्रतिपादनादेवास्य वैशेषिकमिति संज्ञा।

माघस्य काव्ये वैशेषिकदर्शनस्य सिद्धान्तानां विश्लेषणं प्राप्यते यथा –

अन्तर्जलौघमवगाढवतः कपोलौ हित्वा क्षणं विततपक्षतिरन्तरीक्षे।
द्रव्याश्रयेष्वपि गुणेषु रराज नीलो वर्णः पृथग्गत इवालिगणो गजस्य।।[26]

जलौघे अन्तरित्यन्तर्जलौघम्। अथवा जलौघं जलपूरमन्तरभ्यन्तरेऽवगाढवतः प्रविष्टवतो गजस्य कपोलौ हित्वा क्षणमन्तरीक्षे उपर्याकाशे विततपक्षतिर्विस्तृतपक्षमूल आमूलाद्विततपक्ष इत्यर्थः। अलिगणो भ्रमरसङ्घो गुणेषु रूपादिषु द्रव्यमाश्रयो येषां तेषु द्रव्याश्रयेष्वपि अयुतसिद्धत्वाद् द्रव्यसमवेतत्वाच्च। द्रव्याधीनसत्ताकेषु सत्स्वपीत्यर्थः। पृथग्गतो

जलमज्जनभयात् स्वाश्रयपरिहारेण स्थितो नीलो वर्णो नीलरूपं गजस्य नीलिमेव रराज। अत्र कविः 'गुणाश्रयो द्रव्यम्' 'गुणा द्रव्याश्रिताः' इति सिद्धान्तं समर्थयति। वैशेषिकदर्शने 'द्रव्यगुणकर्मसामान्य विशेषसमवायाभावाः सप्त पदार्थाः' स्वीकृताः।

मीमांसादर्शनम्

जैमिनिविरचितं मीमांसासूत्रं मीमांसादर्शनस्य प्राचीनतमो ग्रन्थः। पुराणेषु जैमिनिः व्यासशिष्यत्वेन वर्णितः। वेदेषु याज्ञिकप्रक्रियादृष्ट्या अस्पष्टानां सन्दिग्धानाञ्च वचनानां शङ्कासमाधानपूर्वकं स्पष्टीकरणं, परस्परविरोधिवचनानां समन्वयश्च मीमांसायाः प्रयोजनम्। मीमांसादर्शनं वैदिककर्मकाण्डस्य समर्थकम्। एतदनुसारेण कर्मणैव अभ्युदयनिःश्रेयसप्राप्तिः। महाकविः शिशुपालवधमहाकाव्ये अनेकत्र मीमांसासम्मतसिद्धान्तानां निरूपणं करोति। पूजार्हानां विवेचनं कुर्वन्नाह कविः –

स्नातकं गुरुमभीष्टमृत्विजं संयुजा च सह मेदिनीपतिम्।
अर्घभाज इति कीर्तयन्ति षट् ते च ते युगपदागताः सदः।।[27]

स्नातको गृहस्थविशेषस्तम्, गुरुं पित्रादिकम्, अभीष्टमिष्टबन्धुम्, ऋत्विजं याजकम्, संयुज्यत इति संयुक् सम्बन्धी जामाता तेन सह मेदिनीपतिं राजानञ्च। तं च मेदिनीपतिञ्चेत्यर्थः। षट् षडेतेऽर्घभाजः पूजार्हा इति कीर्तयन्ति कथयन्ति। वृद्धा इति शेषः। ते च षडपि ते तव सदः सभां युगपदागताः प्राप्ताः।

महाकविः देवताह्वानविषयकमन्त्रविशेषाणामुच्चारण-विषये कथयति –

शब्दितामनपशब्दमुच्चकैर्वाक्यलक्षणविदोऽनुवाक्यया।
याज्यया यजनकर्मिणोऽत्यजन्द्रव्यजातमपदिश्य देवताम्।।[28]

अत्र तत्तद्देवताह्वानमन्त्रैः तेषां तेषां देवानामाह्वानेन सह हविषो दानस्य नियमः सङ्केतितः। विस्तृतविवेचनन्तु वेदविषयकपाण्डित्यनिरूपणप्रसङ्गे प्रस्तुतम्। एवं मीमांसाशास्त्रेऽपि महाकवेः नैपुण्यं सिद्धमेव।

वेदान्तदर्शनम्

वेदस्यान्तो वेदान्तः। अन्तशब्दोऽत्र अवसानभागस्य सिद्धान्तस्य च वाचकः। सदानन्दमुनिमतानुसारं "वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च" इति परिभाषा। उपनिषद् वेदस्य चरमभागः। तत्र वैदिकब्रह्मविद्यासिद्धान्तः प्रतिपादितः। अतोऽस्य दर्शनस्य वेदान्त इति नाम अन्वर्थकम्।
महाकविमाघो अद्वैतवेदान्तस्य तत्त्वानां निरूपणमनेकत्र करोति। "ब्रह्म सत्यं जगन्मिथ्या" इति श्रुतेः समर्थकोऽस्ति। संहारकाले समस्ता जीवात्मानः श्रीकृष्णे एव समाहिता भवन्ति। अनेन श्रीकृष्णस्य पूर्णब्रह्मत्वं सिद्धम्। यथोक्तं नारदेन –

युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत्।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः।।[29]

"एकोऽहं बहुस्याम्" इति श्रुत्यनुसारमेकस्माद् ब्रह्मण एव समस्ता जीवात्मानः प्रकटीभवन्ति ब्रह्मणि एव विलीयन्ते च। महाकविमाघो मायानिवृत्तेः सङ्केतं करोति

जगत्यपर्याप्तसहस्रभानुना न यन्नियन्तुं समभावि भानुना।
प्रसह्य तेजोभिरसंख्यतां गतैरदस्त्वया नुन्नमनुत्तमं तमः।।[30]

मोक्षार्थिनां योगिनां श्रीकृष्ण एव साक्षात्करणीयोऽस्ती इति सङ्केतयन् कविः निर्गुणब्रह्मोपासनां समर्थयति। यथा –

इति ब्रुवन्तं तमुवाच स व्रती न वाच्यमित्थं पुरुषोत्तम! त्वया।
त्वमेव साक्षात्करणीय इत्यतः किमस्ति कार्यं गुरुयोगिनामपि।।[31]

हे पुरुषोत्तम! योगिनामपि त्वमेव साक्षात्करणीयः प्रत्यक्षीकर्त्तव्य इति।

अपि च –

उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमक्षुण्णतयाऽतिदुर्गमम्।
उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरपायसंश्रया।।[32]

उदीर्ण उद्रिक्तो रागो विषयाभिलाषः स एव प्रतिरोधकः प्रतिबन्धकः पाटच्चरश्च यस्मिन्। अभीक्ष्णमक्षुण्णतया अनभ्यस्तत्वेनाप्रतिहतत्वेन च जनैरतिदुर्गमं मोक्षपथमपवर्गमार्गं, कान्तारं चोपेयुषः प्राप्तवतः। मनस्विनः सुमनसः, धीरस्य च। त्वमेव निरपायः पुनरावृत्तिरहितः संश्रयः प्राप्तिर्यस्याः सा तथोक्ता। 'न स पुनरावर्तते' इति श्रुतेः। अग्रभूमिः प्राप्यस्थानम्। 'सोऽहम्' इत्यादिश्रुतेस्तत्प्राप्तेरेव मोक्षत्वादिति भावः। तस्मान्मुमुक्षूणामपि त्वमेव साक्षात्करणीय इति सिद्धम्। 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति श्रुतेः। यथा

कस्यचित्कुतश्चित्संकटान्निर्गतस्य केनचित्कान्तारेण गतस्य किञ्चिन्निर्बाधस्थानप्राप्ति- रभयाय कल्पते तथा त्वमपि मुमुक्षोरिति ध्वनिः।

निर्गुणस्वरूपनिरूपणानन्तरं माघः श्रीकृष्णस्य सगुणस्वरूपं निरूपयति। अस्मिन् संदर्भे कविः भगवतो अवतारग्रहणस्य कारणं महत्त्वञ्च सङ्केतयन्नाह –

लघूकरिष्यन्नतिभारभङ्गुरामम् किल त्वं त्रिदिवादवातरः।
उदूढलोकत्रितयेन साम्प्रतं गुरुर्धरित्री क्रियतेतरां त्वया।।[33]

सृष्टिक्रमे त्रिविधगुणाश्रयेण त्रिविधस्वरूपाणां प्रतीतिर्भवति –

पद्मभूरिति सृजञ्जगद्रजः सत्त्वमच्युत इति स्थितिं नयन्।
संहरन्हर इति श्रितस्तमस्त्रैधमेष भजति त्रिभिर्गुणैः।।[34]

हिरण्मयाण्डेन सृष्टिरचनाया निरूपणं कृतं कविना –

द्रुतशातकुम्भनिभमंशुमतो वपुरर्धमग्नवपुषः पयसि।
रुरुचे विरिञ्चिनखभिन्नबृहज्जगदण्डकैकतरखण्ड-मिव।।[35]

द्रुतं तप्तं यच्छातकुम्भं तपनीयम्। तेन सदृशं तन्निभमिति नित्यसमासः। पयसि समुद्रोदके अर्धं तथा मग्नं वपुर्यस्य तस्यांशुमतोऽर्कस्य मण्डलं विरिञ्चेर्ब्रह्मणो नखेन विभिन्नस्य द्वेधाविदलितस्य बृहतो महती जगदण्डकस्य जगदाश्रयकोशस्य ब्रह्माण्डकस्यैकतरखण्डमन्यतरदलमिव रुरुचे रराज।
तस्य हिरण्मयाण्डस्योत्पत्तेः तेन सृष्टिनिर्माणस्य निरूपणं यथा –

पूर्वमेष किल सृष्टवानपस्तासु वीर्यमनिवार्यमादधौ।
तच्च कारणमभूद्धिरण्मयं ब्रह्मणोऽसृजदसाविदं जगत्।।[36]

एष हरिः पूर्वं प्रथममपः सृष्टवान्। तास्वप्सु अनिवार्यं दुर्वारं वीर्यं रेत आदधावाहितवान्, तद्वीर्यं तु हिरण्मयम्। ब्रह्मणश्चतुर्मुखस्य कारणमभूत्। ब्रह्माण्डं जातमित्यर्थः। असौ तदुत्पन्नो ब्रह्माण्डमिदं जगदसृजत्। सर्वस्यापि प्रपञ्चस्यायमेव मूलकारणमिति भावः। अत्र मनुः – अप एव ससर्जादौ तासु वीर्यमथासृजत्। तदण्डम-भवद्धैमं सहस्रांशुसमप्रभम्।। तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः। (मनु. 1/8-9) इति।

पुनश्च जीवब्रह्मणोरद्वैतत्वं समर्थयति कविः –

रथ्याघोषैर्बृंहणैर्वारणानामैक्यं गच्छन् वाजिनं ह्रेषया च।
व्योमव्यापी सन्ततं दुन्दुभीनामव्यक्तोऽभूदीशितेव प्रणादः।।[37]

सन्ततं व्योमव्यापी गगनस्पृक्, अन्यत्र सर्वगत इत्यर्थः। दुन्दुभीनां रणभेरीणां प्रणादो महाघोषः। रथानां समूहो रथ्या। तासां घोषैः वारणानां बृंहणैः कण्ठघोषैः। वाजिनामश्वानां ह्रेषया हेषणेन च। ऐक्यं मेलनं गच्छन्। अन्यत्र तत्त्वम्पदार्थशोधनादद्वितीयतां गच्छन्। ईशिता ईशयिता ईशत्वोपाधिमान्परमात्मेव। अव्यक्तोऽभूत्, अयं दुन्दुभिघोष इति दुर्भेदो बभूव। अन्यत्र जीवेश्वरोपाधिविलयाद् अयमीश्वरोऽयं जीव इति भेदरहितोऽभूदित्यर्थः।
द्वैतत्वं तु मायावशादेव इति स्पष्टीकरोति कविः –

विहिताद्भुतलोकसृष्टिमाये जयमिच्छन्किल मायया मुरारौ।
भुवनक्षयकालयोगनिद्रे नृपतिः स्वापनमस्त्रमाजहार।।[38]

अर्थात् शिशुपालः श्रीकृष्णं जेतुमिच्छन् स्वापनास्त्रं प्रयुक्तवान्। अत्र मल्लिनाथः– अनादिमायाधारे सकलभुवनसृष्टिसंहारमहानाटकसूत्रधारे सर्वाद्भुतनिधाने सकल-कलुषकषणपटुतराभिधाने पुराणैन्द्रजालिके भगवति हरावति मायया जिगीषेत्यहो महानस्य व्यामोह इति भावः।
श्रीकृष्णस्य परमपुरुषत्वमाह –

उचितस्वप्नोऽपि नीरराशौ स्वबलाम्भोनिधिमध्य-गस्तदानीम्।
भुवनत्रयकार्यजागरूकः स परं तत्र परः पुमानजागः।।[39]

बौद्धदर्शनम्

बौद्धदर्शनं वैभाषिक-सौत्रान्तिक-योगाचार-माध्यमिकभेदात् सम्प्रदायचतुष्टये विभक्तम्। सर्वत्र सिद्धान्तगतो भेदः। बुद्धोपदेशाः पिटकत्रये संगृहीताः सन्ति। महाकविमाघेन संक्षेपतो बौद्धधर्मस्य सिद्धान्तानामपि निरूपणं कृतम्। अधोलिखिते पद्ये कविः बौद्धदर्शनस्य पञ्चस्कन्धानां विवेचनं करोति –

सर्वकार्यशरीरेषु मुक्त्वाऽङ्गस्कन्धपञ्चकम्।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम्।।[40]

सर्वाणि कार्याणि सन्ध्यादीनि तानि शरीराणीवेत्युपमितसमासः। व्यासे सौगतानामिवेति लिङ्गान्तेषु सर्वकार्यशरीरेषु सर्वेषु शरीरेष्विव सर्वकार्येष्वित्यर्थः। अङ्गानि स्कन्धा इवेत्युपमितसमासः। तेषां पञ्चकं मुक्त्वा। स्कन्धपञ्चकमिवाङ्गपञ्चकं हित्वेत्यर्थः। पञ्च

परिमाणमस्येति पञ्चकम्। सुगतो भक्तिर्भजनीय एषां ते सौगता बौद्धाः। तेषामन्य आत्मेव महीभृतामन्यो मन्त्रो नास्ति। कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्, देशकालविभागः, विपत्तिप्रतीकारः, कार्यसिद्धिश्चेति पञ्चाङ्गानि। यथाह कामन्दकः – ''सहायाः साधनोपाया विभागो देशकालयोः। विपत्तेश्च प्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते''।। इति। रूपवेदनाविज्ञानसंज्ञासंस्काराः पञ्च स्कन्धाः। तत्र विषयप्रपञ्चो रूपस्कन्धः, तज्ज्ञानप्रपञ्चो वेदनास्कन्धः, आलयविज्ञानसंतानो विज्ञानस्कन्धः, नामप्रपञ्चः संज्ञास्कन्धः, वासनाप्रपञ्चः संस्कारस्कन्धः। एवं पञ्चधा परिवर्तमानो ज्ञानसंतान एवात्मा इति बौद्धाः। एवं यथा बौद्धानां सर्वेषु शरीरेषु स्कन्धपञ्चकातिरिक्त आत्मा नास्ति, तथा राज्ञामङ्गपञ्चकातिरिक्तो मंत्रो नास्तीति।

जैनदर्शनम्

जिनशब्दो जिधातोः निष्पद्यते। कामक्रोधादिविकारा जिता येन सः'जिनः' इति। जिनेन व्याख्यातं प्रचारितञ्च दर्शनं जैनदर्शनम्। आर्हतदर्शनमस्य प्राचीनसंज्ञा। महाकविमाघेन श्रीकृष्णस्य कृते जिनशब्दः प्रयुक्तः –

भीमास्त्रराजिनस्तस्य बलस्य ध्वजराजिनः।
कृतघोराजिनश्चक्रे भुवः सरुधिरा जिनः।।[41]

**संदर्भ**


1. शिशु.1.33
2. सांख्यकारिका – 3
3. सांख्यकारिका -11
4. शिशु.2.59
5. शिशु. 4.55
6. शिशु. 14.19
7. शिशु. 15.2 (प्र.)
8. शिशु. 15.3 (प्र.)
9. शिशु.4.55
10. योगसूत्रम् 2.29
11. योगसूत्रम् 1.33
12. योगसूत्रम् 2.3
13. शिशु. 13.23
14. योगसूत्रम् 2.30
15. योगसूत्रम् 2.32
16. शिशु.14.60
17. शिशु.14.62
18. योगसूत्रम् 1.24
19. शिशु.15.32
20. शिशु.1.3
21. शिशु.2.91
22. शिशु.17.31
23. शिशु.19.113
24. शिशु.20.11
25. शिशु.20.18
26. शिशु.5.38
27. शिशु.14.55
28. शिशु.14.20
29. शिशु.1.23
30. शिशु.1.27
31. शिशु.1.31
32. शिशु.1.32
33. शिशु.1.36
34. शिशु.14.61
35. शिशु.9.9
36. शिशु.14.67
37. शिशु.18.3
38. शिशु.20.32
39. शिशु.20.36
40. शिशु.2.28
41. शिशु.19.112